A.C. Joshi Library
P.U. Chandigarh

MSS No. 210 Subject Religion

Name of MSS अनुमानः

Author — —

Period — — Folios 4

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 4, 5, 6

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त ॐ श्रीगणेशाय नमः नन्वधिकरणतानिरूपिता यथाऽऽधेयता तथाऽधिकरणतानिरूपितापि आधेयता भवति
१ ऽवतरावहेतुतावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नाधिकरणतानिरूपिताधेयतीय स्वरूपसंबंधेन
साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वं निवेश्य सत्तावान् जातेरित्यादौऽव्याप्तिवारणं कृतं मथुरानाथेन एवं
च वह्निमान्धूमादित्यत्र वह्न्यभावस्याधिकरणे धूमाधिकरणतापि भवति तन्निरूपितवृत्तित्वमेव धूमे वर्तते इति
वह्निमान्धूमादित्यत्राव्याप्तिरिति चेन्न आधेयत्वमत्राधिकरणतानिरूपकत्वं तथा च साध्याभाववद्वृत्तिर्यो हेतु
तावच्छेदकसंबंधावच्छिन्नाधिकरणतातन्निरूपकत्वाभावो व्याप्तिः एवं च वह्निमान्धूमादित्यत्र वह्न्यभावस्य धूमाधिक
रणत्वे सत्वेपि धूमाधिकरणतावृत्तिसंयोगसंबंधावच्छिन्नाधिकरणतानिरूपकत्वस्याभावो धूमे वर्तते इति नाव्याप्तिः ।
केचित्त्वाधिकरणत्वं स्वरूपसंबंधविशेषः तथा च धूमाधिकरणतापि धूमाधिकरणस्वरूपैव इति वह्न्यभाववत् धूमाधि
करणस्वरूपधूमाधिकरणत्वं भवति इति न तन्निरूपितवृत्तित्वमादाय दोषः वस्तुतस्तु धूमाधिकरणावृत्तिर्धूम इतिवत् धू
माधिकरणतावृत्तिर्धूम इति प्रतीतेरनुरोधात् धूमाधिकरणतानिरूपितत्वं धूमाधिकरणतानिरूपितत्वात् विलक्षणमेवा
तथा चाधिकरणतानिरूपितत्वात् विलक्षणं यत्साध्याभावाधिकरणनिरूपितवृत्तित्वं तस्यैवाभावो व्याप्तिरिति ना
धिकरणतावृत्तित्वमादाय दोषः यत्तु अधिकरणताभिन्नं यत्साध्याभाववत् तन्निरूपितवृत्तित्वाभावो व्याप्तिस्तथा चाधि
करणताभिन्नं वह्न्यभाववत्त्वं धूमाधिकरणत्वं किंतु ह्रदादि देव तन्निरूपितवृत्तित्वाभावो धूमे वर्तते इति तत्र वह्निमा
न्धूमाधिकरणताभ्यपरि त्यत्राति व्याप्त्यापत्तेस्तत्राधिकरणताभिन्नं यत्साध्याभाववत् तन्निरूपितवृत्तित्वाभावस्य धूमा १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धिकरणतात्वेसत्वात् नचहेतुतावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नाधिकरणताभिन्नं यत्साध्याभाववद्वृत्तित्वमेव
वक्तव्यं तथा च धूमाधिकरणताया उत्पत्तिस्थलधूमाधिकरणत्वात् रूपहेत्वधिकरणताभिन्नत्वात् नातिव्याप्तिरिति वाच्यं ए
वं सति धूमाधिकरणताभिन्नं धूमादित्यत्र हेत्वधिकरणताभिन्नसाध्याभावाधिकरणाप्रसिद्ध्या अव्याप्त्यापत्तेः पर्वत
नुसाध्याभावाधिकरणनिरूपितस्य धिकरणत्वेनान्निरूपित[illegible]भावाभावात्तत्तथा च वह्न्यभावीयाधिकर[illegible]धूमाधिक
रणत्वेनान्निरूपिताधिकरणतानिरूपितवृत्तित्वाभावस्य धूमे सत्वादिति चेत् न तदपि न मनोरमं धूमवद्वृत्ति[illegible]माधिकरण
त्वात्वादित्यत्राव्याप्त्यापत्तेः तथाहि धूमवद्वृत्तेर्वह्न्यभावाधिकरणे पर्वते तोटोवृत्तिर्यथा धूमाधिकरण[illegible]तन्निरूपितवृत्तित्वस्य धू
माधिकरणतात्वे सत्वादिति साध्याभाववद्वृत्तित्वमित्यत्र साध्याभावाधिकरणनिरूपितवृत्तित्वे हेतुतावच्छेदकसंबंधेना
वच्छिन्नं अन्यथा वह्निमान् धूमादित्यत्र वह्न्यभावाधिकरणधूमावयवनिरूपितसमवायसंबंधावच्छिन्नवृत्तित्वस्य धूमे सत्वेन
वह्न्यभावाधिकरणनिरूपितवृत्तित्वसामान्याभावस्य तत्रासत्वात् वह्निमान् धूमादित्यत्राव्याप्त्यापत्तेः एवं सति नवस्तुनभ्यवन्तित
द्घटाभिन्नं तद्घटासमानकालीनपटादित्यत्र साध्याभाववति तद्घटे तद्घटासमानकालीनपटस्य केनापि संबंधेना
वृत्तेः विभिन्नकालीनयोः सामान्येनैवाधाराधेयभावस्यानभ्युपगमात् हेतुतावच्छेदकसंबंधावच्छिन्नत्वस्य साध्याभावा
धिकरणनिरूपितवृत्तितायां निवेशसंभवात् ज्ञानेत्यत्र सत्ताभावाधिकरणसामान्यादिनिरूपिताहेतुतावच्छेदकीभूत
समवायसंबंधावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तिरेवं च द्रव्यं धूमादित्यत्र द्रव्यत्वाभावाधिकरणनिरूपितसंयोगसंबंधावच्छिन्न
वृत्तित्वाप्रसिद्ध्याव्याप्तिः एवं कालिकसंबंधेन यत्र वाच्यत्वं साध्यं तत्र कालिकसंबंधेन ज्ञेयत्वे हेतुः तत्रापि कालिकसंबंधावच्छिन्न
वाच्यत्वाभावाधिकरणनिरूपितकालिकसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धेः एवं सविषयकत्ववान् घटात् इत्यत्र विषयितासंबंधेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नं॰ चेदेपि सविषयकत्वाभाव इति चेदादौ विषयिता संबंधेन कस्याप्यवर्त्तमानतया विषयितासंबंधावच्छिन्न घटनिरूपितवृत्तिता प्रसिद्धे
२१ रिति वाच्यं एतद्दोषभिया स्वाधिकरणावृत्ति साध्याभाववत्त्वे व्याप्तिरित्यस्य दीधितिकृता केवलान्वयिग्रंथे वक्ष्यमाणत्वात् तत्र च स्वसा
ध्यधिकरणं स्वाधिकरणं स्वाधिकरणानविघ्येतेवृत्तिर्यस्य ऽसौ स्वाधिकरणावृत्तिः साध्याभावो यस्य स्यासौ स्वाधिकरणावृत्ति
साध्याभाववत्त्वं तत्ता स्वाधिकरणावृत्ति साध्याभाववत्त्वे व्याप्तिरित्यस्य तत्र गर्भबहुव्रीहिणा लक्षस्य बोधनात् तथा च यद
धिकरणानिरूपितवृत्तित्वसामान्याभावः साध्याभावे तत्त्वे व्याप्तिरिति निष्कर्षः ननु व्याप्ययदधिकरणानिरूपितवृत्तित्वं
यदि संबंधसामान्येन विवक्षितं तदा वह्निमान् धूमादित्यादौ ऽव्याप्तिः धूमाधिकरणे पर्वते वह्न्यभावस्य कालिकसंबंधेन
वृत्तेः यदि च दैशिकविशेषणताविशेषेणावृत्तित्वं विवक्षितं तदा घटत्वाभाववान् द्रव्यत्वादित्यत्रातिव्याप्तिः तत्र च घटत्वरूप
साध्याभावस्य हेत्वधिकरणेऽभिन्नत्वे दैशिकविशेषणताविशेषणावृत्तेः न चेह त्वधिकरणानिरूपितवृत्तित्वं साध्यवत्ताग्र
हविरोधिताघटकसंबंधावच्छिन्नत्वेनैव ग्राह्य विरोधिताघटकसंबंधश्च साध्यतावच्छेदकसंबंधेन साध्यवत्ताबुद्धिं प्रति
यत्संबंधावच्छिन्नसाध्याभावप्रकारताकनिश्चयत्वेन प्रतिबंधकता तत्संबंधाः तथा च वह्निमान् धूमादित्यत्र संयोगसंबंधा
वच्छिन्नप्रतियोगिताक विशेषणताविशेषसंबंधावच्छिन्नवह्न्यभावनिष्ठप्रकारताकनिश्चयत्वेन प्रतिबंधकत्वाद्दैशिक
विशेषणताविशेषसंबंधः साध्यवत्ताग्रहविरोधिताघटकसंबंधः तेन संबंधेन पर्वते वह्न्यभावस्यावर्त्तमानत्वात् न तत्राव्या
प्तिः घटत्वाभाववान् द्रव्यत्वादित्यादौ साध्यतावच्छेदकीभूतदैशिकविशेषणताविशेषसंबंधेनैव घटत्वाभावप्रकारकबुद्धिं
प्रति घटत्वरूपसाध्याभावस्य समवायेन घटे निश्चयो विरोधीति समवाय एव साध्यवत्ताग्रहविरोधिताघटकः संबंधः तेन
संबंधेन द्रव्यत्वाधिकरणे घटे घटत्वरूपसाध्याभावस्य वर्त्तमानत्वान्न तत्रातिव्याप्तिरिति वाच्यं एवं सति समवायसंबंधाव २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न दत्वाभावस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य विशेषणताविशेषसंबंधेन साध्यतागगनत्वं हेतुस्तत्र हेत्वधिकरणीभू
३ तगगननिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वाभावः साध्यवताग्रहविरोधिताघटकीभूतकालिकसंबंधावच्छिन्नघटत्वाभावाधिकर
णतायाम् अस्तीति तत्रापि लक्षणसमन्वयः अधिकरणभेदेनाधिकरणतायां नो तेहृदत्वादिनिष्ठधूमाभावाधिकरणतायाः वह्न्यधिकर न
णीभूतायोगोलकवृत्तित्वात् धूमवान्वह्नेरित्यत्रातिव्याप्तिः एतत्साध्याभावाधिकरणतासामान्यनिवेशः तथा चायोगोलकनि
ष्ठधूमाभावाधिकरणतायाम् अयोगोलकनिरूपितवृत्तित्वसत्वान्न धूमवान्वह्नेरित्यत्रातिव्याप्तिः अत्र साध्यसामानाधिकरण्यसा
मान्ये यदधिकरणनिरूपितवृत्तित्वसामान्याभावस्तत्वं व्याप्तिरित्युक्तौ न केवलान्वयिनि व्याप्तिस्तत्र वाच्यत्वसामानाधिकरणगग
नादेर्हेत्वधिकरणनिरूपितवृत्तित्वाभावसत्वात् अत्रापि सामान्यपदानुक्तौ धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमसमानाधिकरणे हृद
त्वे वह्न्यधिकरणवृत्तित्वाभावसत्वात् सामान्यपदोक्तौ च धूमसामानाधिकरण्यसामान्यान्तर्गतायःपिंडत्वादेर्वह्न्यधिकरणवृत्तित्वा
भावासत्वान्नातिव्याप्तिः अत्र साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरण
निरूपिते दैशिकविशेषणताविशेषसंबंधावच्छिन्नवृत्तित्वाभावस्तेन न गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र विशिष्टस
त्तायाः सत्तानतिरिक्ततया तदधिकरणेषु गुणकर्मस्ववर्तमानजातित्वे जात्यधिकरणवृत्तित्वाभावसत्वेपि नातिव्याप्तिः न वा यत्र
समवायेन वह्नेः साध्यत्वे संयोगेन धूमो हेतुस्तत्र संयोगेन वह्न्यधिकरणे वर्तमानवह्निसदन्यत्वादौ धूमाधिकरणवृत्तित्वाभावसत्वे
पि नातिव्याप्तिः न वा द्रव्यं सत्वादित्यत्र द्रव्यत्वाधिकरणे महाकाले कालिकसंबंधेन वृत्तिमत्वे सैव वृत्तित्वात् संबंधसामान्येन न द्रव्य ३

नचसाध्यसाधनभेदेनव्याप्तेर्भेदात्तज्ज्ञानात्तज्जातेरित्यादौस्वाधिकरणवृत्तिसाध्याभावकत्वंव्याप्तिःजात्यभाववान्जातित्वादित्यादौतुयथाश्रुतं २।३८
च्छिन्नप्रतियोगिताकजात्यभावस्ययत्रदैशिकविशेषणताविशेषसंबंधेनसाध्यताजातित्वंहेतुस्तत्रहेत्वधिकरणीभूतजातेःसाध्यवत्ता
ग्रहविरोधिताघटकसमवायेनवृत्तेरप्रसिद्धेरव्याप्त्यापत्तिरेवंयत्रघटाभावस्ययःकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्तस्य
विशेषणताविशेषेणसाध्यताऽऽकाशत्वंहेतुस्तत्रसाध्यवत्ताग्रहविरोधिताघटककालिकसंबंधेनगगननिरूपितवृत्तित्वाप्रसिद्धेः
साध्याभाववद्वृत्तित्वमेवव्याप्तिरितिनप्रागुक्तस्थलेऽव्याप्तेराशंका इति वाच्यं यत्रकालिकसंबंधेनध्वंसवृत्तित्वविशिष्टस्यघटत्वाभाव
स्ययःकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्तस्यदैशिकविशेषणताविशेषसंबंधेनसाध्यताऽऽकाशत्वंहेतुस्तत्रसाध्याभावा
धिकरणेध्वंसेहेतुतावच्छेदकीभूतसमवायेनवृत्तेरप्रसिद्धेरेवंहेत्वधिकरणेऽऽत्मनिसाध्यवत्ताग्रहविरोधिताघटकीभूतकालिकेनवृत्तेर
प्रसिद्धेःनिरुक्तलक्षणदोषेऽप्यापत्तिरसत्वात् एवंयत्रसंयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावस्यदैशिकविशेषणताविशेष
संबंधेनसाध्यताविषयितासंबंधेनघटस्यहेतुतातत्रसाध्याभावाधिकरणीभूतभूतलनिरूपितविषयित्वसंबंधावच्छिन्नवृत्तेरप्रसिद्धेः
एवंविषयितासंबंधेनघटाधिकरणनिरूपितसाध्यवत्ताग्रहविरोधिताघटकीभूतसंयोगसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धेःनिरुक्तलक्षण
स्यतत्रगमकतासंभवात् इतिचेन्नस्वाधिकरणवृत्तिसाध्याभावाधिकरणतासामान्यकत्वमेवव्याप्तिः तदर्थश्चसाध्याभावाधिकरण
तासामान्येयदधिकरणनिरूपितवृत्तित्वाभावस्तत्वंयत्पदंहेतुपरंयदधिकरणनिरूपितवृत्तित्वंचस्वरूपसंबंधावच्छिन्नंग्राह्यंएवंच
जात्यभाववान् जातित्वादित्यत्रजातित्वाधिकरणजातिनिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वंजातित्वाधिकरणतायामप्रसिद्धं नत्वभा
वत्वसाध्यवत्ताग्रहविरोधिताघटकीभूतसमवायसंबंधावच्छिन्नजात्यभावाभावाधिकरणतायामस्तीतिलक्षणसमन्वयःएवंच
ग्राह्यंसाध्याभावाधिकरणत्वंचसाध्यवत्ताग्रहविरोधिताघटकसंबंधावच्छिन्नं ३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ताश्रयपरतयाऽनुमितिविधेयताश्रयनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकभेदाधिकरणवृत्तित्वाभावपर्यवसन्नस्य साध्य
वत्प्रतियोगिकान्योन्याभावसामानाधिकरण्यस्य न अपि संयोगी एतद्वृत्तत्वादित्यादावव्याप्तिः नत्र हेत्वंतरवृत्तिकपि संयोगो नानु
मितिविधेयतारूपसिद्धिकर्मत्वाश्रयः किंतु एतद्वृत्तिकपिसंयोगत्वनिष्ठावच्छेदकताकप्रतियोगिताकप्रतियोगिताकभेदाधि
करणत्वेन तद्वृत्तेः किंतु वृत्त्यंतरे तन्निरूपितवृत्तित्वाभावस्य एतद्वृत्तित्वे सत्वात् न तत्र व्याप्तिः किंतु यत्र सपक्षः प्रसिद्धः तत्रैव नाना
व्यक्तिसाध्यके भवति अत एव विधेयितिकसाध्ये हेतोः साध्यवत्पक्षभिन्नदृष्टांतपक्षवृत्तित्वेन अनुपेक्ष्य साध्यवत्पक्षभिन्नदृष्टांतवृत्तित्वे
नेत्युक्तं दृष्टांतवृत्तित्वदेः अनुमितिविधेयरूपसिद्धिकर्मत्वाभावात् ननु गंधवती पृथिवीत्वादित्यत्र तन्मूधवद्भेदमादाय व्याप्तिर्ज
नाधेयेन हेतावदंशेऽन्येन तत्र वह्निमान् धूमादित्यत्राव्याप्तिः कथमुपेक्षितेति चेन्न तत्र धूमेन साध्ये तत्र देशे व्याप्तिस्थितिमते
सद्धेतौ पर्वतीयवह्निनिष्ठावच्छेदकताकप्रतियोगिताकभेदाधिकरणवृत्तित्वाभावस्य पर्वतीयधूमे सत्वात् न च लक्षणासंगतिः गंधव
ती पृथिवीत्वादित्यत्र पृथिवीत्वस्यैकत्वेन गंधनिष्ठावच्छेदकताप्रतियोगिताकभेदाधिकरणवृत्तित्वाभावो न तस्याप्तिरिति विशेषः ।
साध्यनिष्ठावच्छेदकताकप्रतियोगिताकत्वं तु साध्यनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकप्रतियोगिकत्वं अतो वह्निम
त्वेऽभयभेदस्यापि वह्निनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकतया तदधिकरणीभूतपर्वतवृत्तित्वस्य पर्वतीयधूमे सत्वेऽपि न
वह्निमान् धूमादित्यत्राव्याप्तिः एवं साध्यनिष्ठावच्छेदकतापि साध्यतावच्छेदकतातिरिक्तविशेष्यतानवच्छिन्नावगन्तव्या तेन द्रव्यं पृ ८
थिवीत्वादित्यादौ घटवृत्तित्वविशिष्टद्रव्यत्वभेदाधिकरणवृत्तित्वस्य पृथिवीत्वे सत्वेऽपि न द्रव्यं पृथिवीत्वात् न व्याप्तिः ॥ इति श्रीसंपूर्णं समाप्तम्

210

210

Sans. MS. 294.1?		
A636		अनुमान ; खंडित तथा कीटभक्षित 5 पत्रक ॥ ले० अ० १५पं० प्रा० पृ०
210-MS.		
		ह० ले०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative